# Tridevanamananyatvapratipadanam

# ત્રિદેવાનામાનન્યત્વપ્રતિપાદનમ્

## Document Information

Text title : Tridevanam Ananyatva Pratipadanam

File name : tridevAnAmAnanyatvapratipAdanaM.itx

Category : deities_misc, shiva, vishhnu

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : Kalikapurana Adhyaya 12 shloka 1-67

Latest update : January 15, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# ત્રિદેવાનામાનન્યત્વપ્રતિપાદનમ્

Oneness of the trinity Brahma-Vishnu-Mahesha

ઋષય ઊચુઃ -
અનન્યત્વં ત્રિદેવાનાં યજ્જગાદ જનાર્દનઃ ।
શમ્ભવે તદ્વયં શ્રોતુમિચ્છામો દ્વિજસત્તમ ॥ ૧॥

એકત્વં દર્શયામાસ કથં વા ગરુડધ્વજઃ ।
તત્ સમાચક્ષ્વ વિપ્રેન્દ્ર પરં કૌતૂહલં હિ નઃ ॥ ૨॥

માર્કણ્ડેય ઉવાચ -
શ ૃણુધ્વં મુનયો ગુહ્યં પરમં પ્રયતં પરમ્ ।
ત્રિદેવાનામનન્યત્વં તથૈવૈકત્વદર્શનમ્ ॥ ૩॥

હરેણ પૃષ્ટો ગોવિન્દસ્તં સમાભાષ્ય સાદરમ્ ।
ઇદમાહ મુનિશ્રેષ્ઠા અભિન્નપ્રતિપાદકમ્ ॥ ૪॥

શ્રીભગવાનુવાચ -
ઇદં તમોમયં સર્વમાસીદ્ભુવનવર્જિતમ્ ।
અપ્રજ્ઞાતમલક્ષ્યઞ્ચ પ્રસુપ્તમિવ સર્વતઃ ॥ ૫॥

ન દિવારાત્રિભાગોઽત્ર નાકાશં ન ચ કાશ્યપી ।
ન જ્યોતિર્ન જલં વાયુર્નાન્યત્ કિઞ્ચન સંસ્થિતમ્ ॥ ૬॥

એકમાસીત્ પરં બ્રહ્મ સૂક્ષ્મં નિત્યમતીન્દ્રિયમ્ ।
અવ્યક્તં જ્ઞાનરૂપેણ દ્વૈતહીનવિશેષણમ્ ॥ ૭॥

પ્રકૃતિઃ પુરુષશ્ચૈવ નિત્યૌ દ્વૌ સર્વસંહિતૌ ।
સ્થિતઃ કાલોઽપિ ભૂતેશ જગત્કારણમેકકમ્ ॥ ૮॥

યદેકં પરમં બ્રહ્મ તત્સ્વરૂપાત્ પરં હર ।
રૂપત્રયમિદં નિત્યં તસ્યૈવ જગતઃ પતેઃ ॥ ૯॥

કાલો નામાપરં રૂપમનાદ્યં તત્તુકારણમ્ ।
સર્વેષામેવ ભૂતાનામવચ્છેદેન સઙ્ગતઃ ॥ ૧૦॥

તતસ્તત્ સ્વપ્રકાશેન ભાસ્વદ્રૂપં પ્રકાશતે ।
પુરા સૃષ્ટ્યર્થમતુલં ક્ષોભયન્ પ્રકૃતિં સ્વયમ્ ॥ ૧૧॥

સઙ્ક્ષુબ્ધાયાન્નુ પ્રકૃતૌ મહત્તત્ત્વમજાયત ।
મહત્તત્ત્વાત્તતઃ પશ્ચાદહઙ્કારસ્ત્રિધાભવત્ ॥ ૧૨॥

અહઙ્કારે તુ સઞ્જાતે શબ્દતન્માત્રતસ્તતઃ ।
આકાશમસૃજદ્વિષ્ણુરનન્તં મૂર્તિવર્જિતમ્ ॥ ૧૩॥

તતસ્તુ રસતન્માત્રાદપઃ સૃષ્ટ્વા મહેશ્વરઃ ।
નિરાધારઃ સ્વયં દધ્રે તાસ્તદા નિજમાયયા ॥ ૧૪॥

તતસ્ત્રિગુણસામ્યેન સંસ્થિતાં પ્રકૃતિં પ્રભુઃ ।
પુનઃ સઙ્ક્ષોભયામાસ સૃષ્ટ્યર્થં પરમેશ્વરઃ ॥ ૧૫॥

તતઃ સા પ્રકૃતિસ્તાસુ બીજં ત્રિગુણધાભવત્ ।
અપ્સુ સંસર્જયામાસ જગદ્બીજં નિરાકુલમ્ ॥ ૧૬॥

તદ્વિવૃદ્ધં ક્રમેણૈવ હૈમમણ્ડમભૂન્મહત્ ।
જગ્રાહાપઃ સમસ્તાસ્તા ગર્ભ એવ તદણ્ડકમ્ ॥ ૧૭॥

અપ્સુ સ્થિતાસુ હૈમાણ્ડગર્ભે વિષ્ણુસ્તદણ્ડકમ્ ।
ત્વયૈવ માયયા દધ્રે બ્રહ્માણ્ડમતુલં પુનઃ ॥ ૧૮॥

વારિણા વહ્નિભિશ્ચૈવ વાયુભિર્નભસા તથા ।
બહિસ્તદણ્ડકં છન્નં સર્વપાર્શ્વે સમન્તતઃ ॥ ૧૯॥

સપ્તસાગરમાનેન તથા નદ્યાદિ માનતઃ ।
બ્રહ્માણ્ડાભ્યન્તરે તોયં તદન્યત્તુ બહિર્ગતમ્ ॥ ૨૦॥

તદન્તઃ સ્વયમેવાસૌ વિષ્ણુર્બ્રહ્મસ્વરૂપધૃક્ ।
દૈવં વર્ષમુષિત્વૈવ પ્રબિભેદ તદણ્ડકમ્ ॥ ૨૧॥

તસ્માત્ સમભવન્મેરુરુત્પન્નોઽસ્મિન્ મહેશ્વર ।
જરાયુઃ પર્વતા જાતાઃ સમુદ્રાઃ સપ્ત તજ્જલાત્ ॥ ૨૨॥

તન્મધ્યે ગન્ધતન્માત્રાત્ પૃથિવી સમજાયત ।
ઈશ્વરેણ પ્રકૃત્યા ચ યોજિતા ત્રિગુણાત્મિકા ॥ ૨૩॥

પ્રાગેવ પર્વતાદિભ્યઃ સમુત્પન્ના વસુન્ધરા ।
બ્રહ્માણ્ડખણ્ડસંયોગાદ્દૃઢા ભૂતા તુ સા ભૃશમ્ ॥ ૨૪॥

તસ્યામેવ સ્થિતો બ્રહ્મા સર્વલોકગુરુઃ સ્વયમ્ ।
યદા બ્રહ્માણ્ડમધ્યસ્થો બ્રહ્મા વ્યક્તો ન ચાભવત્ ।
તદૈવ રૂપતન્મત્રાત્તેજઃ સમ્યગજાયત ॥ ૨૫॥

વાયુસ્તુ સ્પર્શતન્માત્રાત્ પ્રકૃત્યા વિનિયોજિતાત્ ।
બભૂવ સર્વભૂતાનાં પ્રાણભૂતઃ સમન્તતઃ ॥ ૨૬॥

અદ્ભિસ્તેજોભિરતુલૈર્વાયુભિર્નભસા તથા ।
અન્તર્બહિસ્તદણ્ડસ્ય વ્યાપ્તમન્યત્તુ ગર્ધગમ્ ॥ ૨૭॥

તતો બ્રહ્મશરીરન્તુ ત્રિધા ચક્રે મહેશ્વરઃ ।
પ્રધાનેચ્છાવશાચ્છમ્ભૌ ત્રિગુણત્રિગુણીકૃતમ્ ॥ ૨૮॥

તદૂર્ધ્વભાગઃ સઞ્જાતશ્ચતુર્વક્ત્રશ્ચતુર્ભુજઃ ।
પદ્મકેશરગૌરાઙ્ગકાયો બ્રાહ્મો મહેશ્વરઃ ॥ ૨૯॥

તન્મધ્યભાગો નીલાઙ્ગ એકવક્ત્રશ્ચતુર્ભુજઃ ।
શઙ્ખચક્રગદાપદ્મપાણિઃ કાયઃ સ વૈષ્ણવઃ ॥ ૩૦॥

અભવત્તદધોભાગઃ પઞ્ચવક્ત્રશ્ચતુર્ભુજઃ ।
સ્ફટિકાભ્રસમઃ શુક્લઃ સકાયશ્ચન્દ્રશેખર ॥ ૩૧॥

ઇતસ્તતો બ્રાહ્મકાયે સૃષ્ટિશક્તિં ન્યયોજયત્ ।
સ્વયમેવાભવત્ સષ્ટા બ્રહ્મરૂપેણ લોકભૃત્ ॥ ૩૨॥

સ્થિતિશક્તિં નિજાં માયાં પ્રકૃત્યાખ્યાં ન્યયોજયત્ ।
મહેશો વૈષ્ણવે કાયે જ્ઞાનશક્તિં નિજાં તથા ॥ ૩૩॥

સ્થિતિકર્તાભવદ્વિષ્ણુરહમેવ મહેશ્વરઃ ।
સર્વશક્તિનિયોગેન સદા તદ્રૂપતા મમ ॥ ૩૪॥

અન્તશક્તિં તથાકાયે શામ્ભવે ચ ન્યયોજયત્ ।
અન્તશક્તિં તથાકાયે શામ્ભવે ચ ન્યયોજયત્ ॥ ૩૫॥

અન્તકર્તાભવચ્છમ્ભુઃ સ એવ પરમેશ્વરઃ ।
તતસ્ત્રિષુ શરીરેષુ સ્વયમેવ પ્રકાશતે ॥ ૩૬॥

જ્ઞાનરૂપં પરં જ્યોતિરનાદિર્ભગવાન્ પ્રભુઃ ।
સૃષ્ટિસ્થિત્યન્તકરણાદેક એવ મહેશ્વરઃ ॥ ૩૭॥

બ્રહ્મા વિષ્ણુઃ શિવશ્ચેતિ સંજ્ઞામાપ પૃથક્ પૃથક્ ।
અતસ્ત્વઞ્ચ વિધાતા ચ તથાહમપિ ન પૃથક્ ।
એવં શરીરં રૂપઞ્ચ જ્ઞાનમસ્માકમન્તરમ્ ॥ ૩૮॥

માર્કણ્ડેય ઉવાચ -
એતચ્છ્રુત્વા વચસ્તસ્ય વિષ્ણોરમિતતેજસઃ ।
હર્ષોત્ફુલ્લમુખઃ પ્રોચે પુનરેવ જનાર્દનમ્ ॥ ૩૯॥

ઈશ્વર ઉવાચ -
એક એવ મહેશશેત્ જ્યોતીરૂપો નિરઞ્જનઃ ।
કા વા માયાથ કઃ કાલઃ કા વા પ્રકૃતિરુચ્યતે ॥ ૪૦॥

કે પુમાંસસ્તતોઽભિન્ના ભિન્નાશ્ચેત્ કથમેકતા ।
તન્મે વદસ્વ ગોવિન્દ તત્પ્રભાવં યથાગતમ્ ॥ ૪૧॥

શ્રીભગવાનુવાચ -
ત્વમેવ પશ્યસિ સદા ધ્યાનસ્થઃ પરમેશ્વરમ્ ।
આત્મન્યાત્મસ્વરૂપં મજ્જ્યોતીરૂપં સદક્ષરમ્ ॥ ૪૨॥

માયાઞ્ચ પ્રકૃતિં કાલં પુરુષઞ્ચ સ્વયં વિભો ।
જ્ઞાતા ત્વં ધ્યાનયોગેન યસ્માદ્ધ્યાનપરો ભવ ॥ ૪૩॥

માયયા મોહિતો યસ્માદધુના ત્વમ્મદીયયા ।
તતો વિસ્મૃત્ય પરમં જ્યોતિર્હિ વનિતારતઃ ॥ ૪૪॥

અધુના કોપયુક્તસ્ત્વં વિસ્મૃત્યાત્માનમાત્મનિ ।
યાં પચ્છસિ પ્રકૃત્યાદિરૂપાણિ પ્રથમાધિપ ॥ ૪૫॥

માર્કણ્ડેય ઉવાચ -
તતસ્તત્ર મહાદેવઃ શ્રુત્વા વાક્યં સુનિશ્ચિતમ્ ।
મુનીનાં પશ્યતાં યોગયુક્તો ધ્યાનપરોઽભવત્ ॥ ૪૬॥

આસાદ્ય બદ્ધપર્યઙ્કં નિર્નિમીલિતલોચનઃ ।
આત્માનઞ્ચિન્તયામાસ તદાત્મનિ મહેશ્વરઃ ॥ ૪૭॥

પરં ચિન્તયતસ્તસ્ય શરીરં વિબભૌ શુભમ્ ।

તેજોભિરુજ્જ્વલં દ્રષ્ટું નશેકુર્મુનયસ્તદા ॥ ૪૮॥

તત્ક્ષણાત્ ધ્યાનયુક્તશ્ચ શમ્ભુઃ સ વિષ્ણુમાયયા ।
પરિત્યક્તોઽતિ વિબભૌ તપસ્તેજોભિરુજ્જ્વલઃ ॥ ૪૯॥

યે યે ગણાસ્તદા તસ્થુઃ સેવયા શઙ્કરાન્તિકે ।
ન તેઽપિ વીક્ષિતું શેકુઃ શઙ્કરં વા દિવાકરમ્ ॥ ૫૦॥

સ્વયમેવ તદા વિષ્ણુઃ સમાધિમનાસો ભૃશમ્ ।
પ્રવિવેશ શરીરાન્તર્જ્યોતીરુપેણ ધૂર્જટેઃ ॥ ૫૧॥

પ્રવિશ્ય તસ્ય જઠરે યથા સૃષ્ટિક્રમઃ પુરા ।
તથૈવ દર્શયામાસ સ્વયં નારાયણોઽવ્યયઃ ॥ ૫૨॥

ન સ્થૂલં ન ચ સૂક્ષ્મઞ્ચ ન વિશેષણગોચરમ્ ।
નિત્યાનન્દં નિરાનન્દમેકં શુદ્ધમતીન્દ્રિયમ્ ॥ ૫૩॥

અદૃશ્યં સર્વદ્રષ્ટારં નિર્ગુણં પરમં પદમ્ ।
પરમાત્માનમાનન્દં જગત્કારણકારણમ્ ॥ ૫૪॥

પ્રથમં દદૃશે શમ્ભુરાત્માનં તત્સ્વરૂપિણમ્ ।
તત્ર પ્રવિષ્ટમનસા બહિર્જ્ઞાનવિવર્જિતઃ ॥ ૫૫॥

તસ્યૈવ રૂપં પ્રકૃતિં સૃષ્ટ્યર્થે ભિન્નતાં ગતામ્ ।
દદર્શ તસ્યૈવાભ્યાસે પૃથગ્ભૂતામિવૈકિકામ્ ॥ ૫૬॥

પુરુષાંશ્ચ દદર્શાસૌ યથૈવ વસતસ્તતઃ ।
અગ્નેરિવ કણાત્ સ્થૂલાદજસ્રં દ્વિજસત્તમાઃ ॥ ૫૭॥

તદેવ કાલરૂપેણ ભાસતે ચ મુહુર્મુહુઃ ।
સૃષ્ટિસ્થિત્યન્તયોગાનામવચ્છેદેન કારણમ્ ॥ ૫૮॥

પ્રકૃતિઃ પુરુષશ્ચૈવ કાલોઽપિ ચ મુહુર્મુહુઃ ।
અભિન્નાન્ ભાસમાનાંશ્ચ સર્ગાર્થે ભિન્નતાં ગતામ્ ॥ ૫૯॥

પૃથગ્ભૂતાનભિન્નાંશ્ચ દદૃશે ચન્દ્રશેખરઃ ।
એકમેવાદ્વયં બ્રહ્મ નેહ નાનાસ્તિ કિઞ્ચન ॥ ૬૦॥

સપ્રધાનસ્વરૂપેણ કાલરૂપેણ ભાસતે ।
તથાપુરુષરૂપેણ સંસારાર્થં પ્રવર્તતે ॥ ૬૧॥

ભોગાર્થં પ્રાણિનાં શશ્વચ્છરીરે ચ પ્રવર્તતે ।
સૈવ માયા યા પ્રકૃતિ સા મોહયતિ શઙ્કરમ્ ॥ ૬૨॥

હરિં તથા વિરિઞ્ચિઞ્ચ તથૈવાન્યજનુર્ભવાન્ ।
માયાખ્યા પ્રકૃતિર્જાતા જન્તું સમ્મોહયત્યપિ ॥ ૬૩॥

સા સ્ત્રીરૂપેણ ચ સદા લક્ષ્મીભૂતા હરેઃ પ્રિયા ।
સા સાવિત્રી રતિઃ સન્ધ્યા સા સતી સૈવ વીરિણી ॥ ૬૪॥

બુદ્ધિરૂપા સ્વયં દેવી ચણ્ડિકેતિ ચ ગીયતે ।
ઇતિ સ્વયં દદર્શાશુ ધ્યાનમાર્ગગતો હરઃ ॥ ૬૫॥

મહદાદિ પ્રભેદેન તથા સૃષ્ટિક્રમં સ્વયમ્ ॥ ૬૬॥

દર્શયિત્વા હરિઃ કાલં પ્રકૃતિં પુરુષાંસ્તથા ।
તથાન્યદ્દર્શયામાસ તચ્છરીરં દ્વિજોત્તમાઃ ॥ ૬૭॥

ઇતિ શ્રીકાલિકાપુરાણે ત્રિદેવાનામાનન્યત્વપ્રતિપાદેન દ્વાદશોઽધ્યાયઃ ।

Proofread by PSA Easwaran

*Tridevanamananyatvapratipadanam*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*